योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः २०

पुण्य उवाच ।

कः पिता किं च वा मित्रं का माता के च बान्धवाः ।

स्वबुद्ध्यैवावधूयन्ते वात्यया जनपांसवः ।। १

बन्धुमित्रसुतस्नेहद्वेषमोहदशामयः ।

स्वसंज्ञामात्रकेणैव प्रपञ्चोऽयं वितन्यते ।। २

बन्धुत्वे भावितो बन्धुः परत्वे भावितः परः ।

विषामृतदशेवेह स्थितिर्भावनिबन्धनी ।। ३

एकत्वे विद्यमानस्य सर्वगस्य किलात्मनः ।

अयं बन्धुः परश्चायमित्यसौ कलना कुतः ।। ४

रक्तमांसास्थिसंघाताद्देहादेवास्थिपञ्जरात् ।

कोऽहं स्यामिति चित्तेन स्वयं पुत्र विचारय ।। ५

दृष्ट्या तु पारमार्थिक्या न कश्चित्त्वं न वास्म्यहम् ।

मिथ्याज्ञानमिदं पुण्यः पावनश्चेति वल्गति ।। ६

कस्ते पिता कश्च सुहृत्का माता कश्च वा परः ।

खस्यानन्तविलासस्य किमस्वं किं स्वमुच्यताम् ।। ७

असि चेत्त्वं तदन्येषु यातेषु बहुजन्मसु ।

ये बन्धवो ये विभवाः किं तानपि न शोचसि ।। ८

बभूवुस्ते सुपुष्पासु स्थलीषु मृगयोनिषु ।

बहवो बन्धवो मार्गास्तान्कथं नानुशोचसि ।। ९

बभूवुस्ते सपद्मासु तटीष्वम्भोजिनीषु ते ।

हंसस्य बन्धवो हंसास्तान्कथं नानुशोचसि ।। १०

बभूवुस्तेऽलमन्यत्र चित्रासु वनराजिषु ।

बहवो बन्धवो वृक्षास्तान्कथं नानुशोचसि ।। ११

बभूवुस्ते महोग्रेषु शिखरेषु महीभृताम् ।

बहवो बान्धवाः सिंहास्तान्कथं नानुशोचसि ।। १२

बभूवुस्ते स्रवन्तीषु सरःस्वम्भोजिनीषु च ।

बहवो बन्धवो मत्स्यास्तान्कथं नानुशोचसि ।। १३

बभूविथ दशार्णेषु कपिलो वनवानरः ।

राजपुत्रस्तुषारेषु पुण्ड्रेषु वनवायसः ।। १४

हैहयेषु च मातङ्गस्त्रिगर्तेषु च गर्दभः ।

शाल्वेषु सरमापुत्रः पतत्री सरलद्रुमे ।। १५

विन्ध्याद्रौ पिप्पलो भूत्वा घुणो भूत्वा महावटे ।

मन्दरे कुक्कुटो भूत्वा विप्रो जातोऽसि कन्दरे ।। १६

कोसलेषु द्विजो भूत्वा भूत्वा वङ्गेषु तित्तिरिः ।

अश्वो भूत्वा तुषारेषु जातस्त्वं ब्रह्मणोऽध्वरे ।। १७

यः कीटस्तालकन्दान्तर्मशको य उदुम्बरे ।

यः प्राग्बको विन्ध्यवने स त्वं पुत्र ममानुजः ।। १८

हिमवत्कन्दरे भूर्जतनुत्वग्ग्रन्थिकोटरे ।

पिपीलिको यः षण्मासान्सोऽयं त्वमनुजो मम ।। १९

स्थितः सीमान्तकुग्रामगोमये यश्च वृश्चिकः ।।

सार्धसंवत्सरं साधो सोऽयं त्वमनुजो मम ।। २०

पुलिन्दीस्तनपीठेषु निलीनं येन कानने ।

षट्पदेनेव पद्मेषु सोऽयं त्वमनुजो मम ।। २१

एतास्वन्यासु बह्वीषु जनयोनिषु पुत्रक ।

जातोऽसि जम्बूद्वीपेऽस्मिन्पुरा शतसहस्रशः ।। २२

इत्थं तवात्मनश्चैव प्राक्तनं वासनाक्रमम् ।

पश्यामि सूक्ष्मया बुद्ध्या सम्यग्दर्शनशुद्धया ।। २३

ममापि बह्व्यो बहुधा योनयो मोहमन्थराः ।

समतीताः स्मराम्यद्य ता ज्ञानोदितया दृशा ।। २४

त्रिगर्तेषु शुको भूत्वा भेको भूत्वा सरित्तटे ।

वनेषु लावको भूत्वा जातोऽहमिह कानने ।। २५ ।

भुक्त्वा पुलिन्दतां विन्ध्ये कृत्वा वङ्गेषु वृक्षताम् ।

उष्ट्रत्वमपि विन्ध्याद्रौ जातोऽहमिह कानने ।। ५६

यश्चातको हिमगिरौ यो राजा पौण्ड्रमण्डले ।

व्याघ्रो यः सह्यकुञ्जेषु स एवाहं तवाग्रजः ।। २७

यो गृध्रो दशवर्षाणि यो ग्राहो मासपञ्चकम् ।

यः समानां शतं सिंहः स एवेह तवाग्रजः ।। २८

आन्ध्रग्रामचकोरेण तुषारनृपराजिना ।

श्रीशैलाचार्यपुत्रेण दम्भवत्कथ्यते मया ।। २९

सर्वे विविधसंसारा विविधाचारचेष्टिताः ।

विलासा जन्मनो भ्रान्तेः स्मर्यन्ते प्राक्तना मया ।। ३०

एवं स्थिते जगज्जाता बान्धवाः शतशो गताः ।

पितरो मातरश्चैव भ्रातरः सुहृदस्तथा ।। ३१

कांस्तान्समनुशोचावो न शोचावश्च कानपि ।

बन्धूनिहातिशोचाव ईदृश्येव जगद्गतिः ।। ३२

अनन्ताः पितरो यान्ति यान्त्यनन्ताश्च मातरः ।

इह संसारिणां पुंसां वनपादपपर्णवत् ।। ३३

किं प्रमाणमतः पुत्र दुःखस्यात्र सुखस्य च ।

तस्मात्सर्वं परित्यज्य तिष्ठावः स्वच्छतां गतौ ।। ३४

प्रपञ्चभावनां त्यक्त्वा मनस्यहमिति स्थिताम् ।

तां गतिं गच्छ भद्रं ते यां यान्ति गतिकोविदाः ।। ३५

इहाजवं जवीभावं पतनोत्पतनात्मकम् ।

न च शोचन्ति सुधियश्चिरं वल्गन्ति केवलम् ।। ३६

भावाभावविनिर्मुक्तं जरामरणवर्जितम् ।

संस्मरात्मानमव्यग्रो मा विमूढमना भव ।। ३७

न ते दुःखं न ते जन्म न ते माता न ते पिता ।

आत्मैवासि न सद्बुद्धे त्वमन्यः कश्चिदेव हि ।। ३८

अस्यां संसारयात्रायां नानाभिनयदायिनः ।

अज्ञा एव नराः साधुरसभावसमन्विताः ।। ३९

मध्यस्थदृष्टयः स्वस्था यथाप्राप्तार्थदर्शिनः ।

तज्ज्ञास्तु प्रेक्षका एव साक्षिधर्मे व्यवस्थिताः ।। ४०

कर्तारोऽपि न कर्तारो यथा दीपा निशागमे ।

आलोककर्मणामेवं तज्ज्ञा लोकस्थिताविह ।। ४१

प्रतिबिम्बे न दृश्यन्ते स्वात्मबिम्बगतैरपि ।

यथा दर्पणरत्नाद्यास्तथा कार्ये महाधियः ।। ४२

सर्वैषणामयकलङ्कविवर्जितेन स्वस्थात्मभावकलितेन हृदब्जमध्ये ।

पुत्रात्मनात्मनि महामुनिनामुनैव संत्यज्य संभ्रममलं परितोषमेहि ।। ४३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु उपशमप्रकरणे पावनबोधो नाम विंशः सर्गः ।। २० ।।